# संस्कृतवार्ताः

दिनाङ्क :- 14.05.2025 प्रात: - 06:55

## अथ वार्ताः

### प्रधानमन्त्रिणः आदमपुरयात्रा

प्रधानमन्त्री नरेन्द्रमोदी एकं सबलं सन्देशं प्रदत्तवान् यत् पाकिस्ताने एतादृशं एकमपि स्थानं न अवशिष्टं यत्र आतङ्किनः शान्त्या श्वासमपि ग्रहीतुं शक्नुयुः। भारतम् आतङ्कवादिनां गृहेषु प्रविश्य तान् च नष्टीकर्तुं पूर्णतया समर्थम् अस्ति। प्रधानमन्त्री अमुं सन्देशं पञ्जाबप्रान्तस्य आदमपुरवायुसेनास्थानके वायुसैन्ययोद्धृभिः सैनिकैः सह संवादावधौ प्रदत्तवान्। तेन सिन्दूराभियानावधौ सैन्यबलस्य वीरता देशरक्षार्थं भूरिशः प्रशंसिता।

सिन्दूराभियानस्य साफल्यविषये श्रीमोदी उक्तवान् यत् अस्य अभियानस्य अन्तर्गतं न केवलम् आतङ्ककेन्द्राणि नष्टीकृतानि अपि तु शताधिकाः आतङ्किनः अपि निहताः।

अनेनोक्तं यत् यस्यां पाकिस्तानीसेनायां एते आतङ्कवादिनः निर्भराः आसन् तान् भारतीय-सशस्त्र-बलम् पराजितवत्। अनेन सबलं प्रतिपादितं यत् सिन्दूराभियानं भारतस्य नीति-नियत-निर्णायक-क्षमतानां एकं संयोजनमस्तीति।

### गवई-मुख्यन्यायाधीशः

न्यायमूर्तिः भूषण-रामकृष्ण-गवई-इत्येषः अद्य भारतस्य द्विपञ्चाशत्तमाय मुख्यन्यायाधीशपदाय शपथवचनं स्वीकरिष्यति। राष्ट्रपति-पदासीना द्रौपदीमुर्मुः राष्ट्रपतिभवने आयोक्ष्यमाणे समारोहे न्यायमूर्तिने गवई-इत्येतस्मै शपथवचनं प्रदास्यति। न्यायमूर्तिः बी. आर. गवई-इत्ययं मुख्यन्यायधीशस्य सञ्जीवखन्ना इत्येतस्य स्थाने समायास्यति यस्य कार्यकालः ह्यः सम्पन्नः।

### विदेशमन्त्रालयः

नवदिल्ली जम्मू-कश्मीर-सम्बद्धायाः कस्याः अपि समस्यायाः समाधानार्थं द्विपक्षीयसम्बन्धानां स्वदीर्घकालिक-पक्षं पुनरावर्तितवती। नवदिल्ल्यां वार्ताहरसम्मेलनावधौ एकस्य प्रश्नस्य प्रत्युत्तरे विदेश-मन्त्रालयस्य प्रवक्ता रणधीरजायसवालः प्रोक्तवान् यत् एतस्मिन् प्रकरणे भारतस्य नीतिः नैव परिवर्तिता तथा च एकः दीर्घकालिकः प्रसङ्ग पाकिस्तानद्वारा अवैधरूपेण अधिगृहीतः यस्मिन् भारतीयक्षेत्रस्य रिक्तकरणं च सम्मिलितं विद्यते।

सिन्धुजलसन्धिविषयम् अभिलक्ष्य श्रीजायसवालः सूचितवान् यत् पहलगामतङ्क्याक्रमणस्य अनन्तरं भारतम् तावत् सन्धिः अयं स्थगितः करिष्यति यावत् पर्यन्तं पाकिस्तानं सीमापारातङ्कवादाय समर्थनप्रदानम् नैव स्थगयिष्यति।

**प्रधानमन्त्री-उपवेशनम्**

प्रधानमन्त्री नरेन्द्रमोदी देशात् क्षयरोगं पूर्णतया नष्टीकर्तुं प्रचाल्यमानेन अभियानेन सम्बद्धस्य एकस्य उपवेशनस्य अध्यक्षतां स्वावासे कृतवान्। चतुर्विंशत्यधिक-द्विसहस्रतमे वर्षे क्षयरोगिणां शीघ्राभिज्ञानस्य उपचारे च जातायाः महत्वपूर्ण प्रगतेः प्रशंसा कुर्वन् प्रधानमन्त्री सम्पूर्णे देशे सफल-रणनीतिम् अग्रे वर्धयितुम् आह्वानमपि कृतवान्।

**वैष्णवः-अर्द्धचालकः**

केन्द्रीयसूचनाप्रौद्योगिकीमन्त्री अश्विनी-वैष्णवः कथितवान् यत् भारते सेमीकण्डक्टर इत्येतस्य अर्द्धचालकस्य कृते निर्माणकार्यं द्रुतगत्या प्रचलति। श्रीवैष्णवः नोएडा-बेङ्गलुरुनगरयोः स्थितानां नवीनात्याधुनिकानां शैलीगतसौविध्यानाम् उद्घाटनं कृतवान्।

**कानचलच्चित्रमहात्सवः**

प्रख्यातः अष्टसप्ततितमः कान्स-चलच्चित्र-महोत्सवः फ्रांसदेशस्य फ्रेञ्च-रिवेरा-स्थले समारब्धः। द्वादशदिनानि यावत् प्रचल्यमाने एतस्मिन् महोत्सवे समग्रविश्वस्य चलच्चित्रनिर्मातारः अभिनेतारः चलच्चित्रजगतः प्रेमिणः च अन्ताराष्ट्रिय-चलच्चित्रस्य उपलब्धीनां प्रदर्शनाय समायास्यन्ति इति।

**बैडमिण्टनः**

बैडमिण्टनप्रतिस्पर्धायां भारतीय-शीर्षक्रीडकाः लक्ष्यसेनः प्रियांशु-राजावतः उन्नतिहुडा मालविकाबंसोडः महिलायुगलं च गायत्रीगोपीचन्द-ट्रीसा-जॉली-इत्येते च अद्य बैंकॉक-नगरे थाईलैण्ड-ओपन-प्रतिस्पर्धायाः मेनड्रा-इत्येतस्मिन् स्वाभियानस्य प्रारम्भं करिष्यन्ति।

।। **इति वार्ता:**।।